# Haridra

**हरिद्रा काञ्चनी पीता निशाख्या वरवर्णिनी ।**
**कृमिघ्ना हलदी योषित्प्रिया हृद्विलासिनी ॥ (Bpn)**

Haridra is also called as Kancani, Pita, Nisakhya, Vara varnini, Krmighna, Haldi, Yositpriya, Hrdvilasini.

**हरिद्रा हरिद्रञ्जनी स्वर्णवर्णा**
**सुवर्णा शिवा वर्णिनी दीर्घरागा ।**
**हरिद्री च पीता वरांगो च गौरी**
**जनिष्ठा वरा वर्णदात्री पवित्रा ॥**

**हरिता रजनी नाम्नी विषघ्नी वरवर्णिनी ।**
**पिङ्गला वर्णदा चैव मङ्गल्या मङ्गला च सा ॥**
**लक्ष्मी भद्रा शिफा शोफा शोभना सुभगाह्वया ।**
**श्यामा जयान्तिका द्वे च त्रिशन्नामविलासिनी ॥ (Rjn)**

Haridra is also called as Haridraranjani, Svarna varna, Suvarna, Siva, Varnini, Dirgharaga, Haridri, Pita, Varanga, Gauri, Janistha, Vara, Varnadatri, Pavitra, Harita, Rajani, Namni, Visaghni, Varavarnini, Pingala, Varnada, Mangalya, Mangala, Lakshmi, Bhadra, Shipha, Sopha, Shobhana, Subhagahvaya, Syama, Jayantika, Vilasini.

**हरिद्रा वर्णिनी गौरी पीता रोमशमूलिका ।**
**पिष्टेष्टा हरिता वैश्या काञ्चनी रजनी निशा ॥**
**पिष्टभद्रा भद्रलता पीताङ्गी वरवर्णिनी ।**
**दीर्घरङ्गा वर्णवती पिण्डा वर्णविलासिनी ॥ (Kdn)**

Haridra, Varnini, Gauri, Pita, Romasamulika, Pistesta, Harita, Vaisya, Kancani, Rajani, Nisha, Pistabhadra, Bhadralata, Pitangi, Varavarnini, Dirgharanga, Varnavati, Pinda, Varnavilasini are the synonyms of Haridra

## कटुतिक्ता निशा मेहकुष्ठपित्तरकफापहम् ।
## प्रलेपाज्जयती कण्डूं शोफं दुष्टव्रणं विषम् ।। (Mdn)

Nisa is katu, tikta in rasa alleviates pitta and kapha, cures meha, kustha, kandu, sopha, dusta vrana and visha.

## हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् ।
## वर्ण्या त्वग्दोषमेहास्रशोफपाण्डुव्रणापहा ।। (Bpn)

Haridra is katu, tikta in rasa, ruksa in guna, usna in veerya, alleviates kapha and pitta is varnya, cures tvag dosha, meha, asra vikara, sopha, pandu and vrana.

## हरिद्रा तु रसे तिक्ता रूक्षोष्णा विषमेहनुत् ।
## कण्डूकुष्ठव्रणान् हन्ति देहवर्णविधायिनी ।।
## विशोधनी कृमिहरा पीनसारुचिनाशिनी । (Dhn)

Haridra is tikta in rasa, ruksa in guna, usna in veerya is deha varna vidhayini and visodhini cures visa, meha, kandu, kustha, vrana, krmi, pinasa and aruci

## हरुद्रा कटुतिक्तोष्णा कफवातास्रकुष्ठनुत् ।
## मेहकण्डूव्रणान् हन्ति देहवर्णविधायिनी ।। (Rjn)

Haridra is katu, tikta in rasa, usna in veerya alleviates kapha and vata cures asra, kustha, meha, kandu, vrana and is deha varna vidhayani.

**निशा तिक्ता कटु रूक्षा वर्ण्योष्णा कफपित्तहा ।**
**पाण्डुव्रणापचीमेहत्वग्दोषविषशोफजित् ॥ (Kdn)**

Nisa is tikta, katu in rasa, ruksa in guna, usna in veerya, alleviates kapha and pitta is varnya cures pandu, vrana, apaci, meha, tvagdosha, visa and sopha

**निशा मेहापचीपित्तत्वग्दोषकृमिपाण्डुजित् ।**
**कफपित्तहरा शोफकण्डूकुष्ठव्रणापहा ॥ (Sdn)**

Nisa alleviates kapha and pitta cures meha, apaci, pitta, tvagdosha, krmi, pandu, sopha, kandu, kustha and vrana.

**हरिद्रा कटुका तिक्ता देहवर्णविधायिका ।**
**उष्णा रूक्षा शोधनी च स्त्रीणां वैभूषणं मता ॥**
**कफं वातं रक्तदोषं कुष्ठं कण्डूं प्रमेहकम् ।**
**त्वग्दोषं च व्रणं शोफं पाण्डूरोगं कृमीन् विषम् ॥**
**पीनसं चारुचिं पित्तमपचीञ्चैव नाशयेत् ॥ (Nir)**

Haridra is katu, tikta in rasa, ruksa in guna, usna in veerya, alleviates kapha, vata and rakta dosha,is deha varna vidhayaka, sodhani, strinam vaibhushanam (women use to adorn them selves) ,cures kustha, kandu, prameha, tvagdosha, vrana, sopha, pandu, krmi, visa, pinasa, aruci, pitta and apaci.

**हरिद्रा कफपित्तघ्नी कण्डूत्त्वग्दोषनाशिनी ।**
**पाण्डूशोफापची चैव मेहकुष्ठव्रणापहा ॥ (Rav)**

Haridra alleviates kapha and pitta cures kandu, tvag dosha, pandu, sopha, apaci, meha, kustha and vrana.